**International Journal of Development in Social Sciences and Humanities** http://www.ijdssh.com

(IJDSSH) 2017, Vol. No. 4, Jul-Dec **e-ISSN: 2455-5142; p-ISSN: 2455-7730**

# *रघुवंशस्य पदार्थमीमांसा*

***डॉ गोविन्द राम चरोरा***
***संस्कृत विभाग***
***महारानी श्री जया महाविद्यालय, भरतपुर***

# RAGHUVANSHASYA PADARTHAMEEMAMSA

**Dr. Govind Ram Charora**
*Department of Sanskrit, Maharani Shri Jaya College, Bharatpur*

*कालिदासः सार्वभौमो महाकविः। तस्य कृतीनाम् विविधपक्षेषु विश्वस्य महान्तो विद्वांसः प्रभूतं सुष्ठतमश्चालिखन्। कालिदासकृतस्य रघुवंशस्य कतिपयपदानां मीमांसा प्रस्तूयते।*

***परन्तपः*** *. परान् शत्रुन् तापयतीति परन्तपःश ण्यन्तात् भौवादिक– तपधातोः परन्तप शब्दो निष्पन्नो भवति।*[1]

*कालिदासेन मगधराजस्य कृते 'परन्तपः' प्रायोजि ।*[2] *इतः पूर्व महाभारतकारेण अर्जुनस्य कृते*[3]*। ततः पूर्वं रामायणकारेण रामस्य भरतस्य च कृते*[4]*। यो हि वीरो महानुभावः स्वपराक्रमेण पुरुषार्थेन यशसा सदाचारेण केनापि वा सद्गुणेन शत्रून् ईर्ष्यालून् द्वेष्टृन् वा पीडयति स परन्तप–पदवाच्यो भवति। एतद् विपरीतम् अरिनन्दनः शत्रुनन्दन इति। यो हि पराक्रमहीनः पुरुषार्थ हीनः सद्गुणहीनो वा मानव आलस्ययुक्तः अकर्मण्यः अयोग्यः अक्षमो वा भवति स अरि– नन्दनपदेन अभिधीयते। विदुला नाम्नी काचिद् मनस्विनी क्षत्रिय– महिला स्वपुत्रम् अरिनन्दन इति कथयित्वा तम् अभर्त्सयत्–*

---

[1] *पा.सू.'द्विपत्परयोस्रूतापे' 3 ।2 ।29*
[2] *परन्तपो नाम यथार्थनाममा। र. वं. 6 ।21*
[3] *क्षुद्रं हृदयदौबल्यं त्यक्वोत्तिष्ठ परन्तप– महाभारतान्तर्गतगीता 2 ।3*
[4] *1) गाथाभिरनुरूपाभिः स्तुतिभिश्च परन्तप 2 ।88 ।9*
*(2) भारं कुशलं बूयाः पितरं च परन्तप, वही 2। ।70 ।1*

*निरुसाहं निरानन्दं निर्वीयमरिनन्दनम्।*
*मास्म सीमन्तिनी काचित् जनयेद् पुत्रमीदृशम्।।*
*महाभारतान्तर्गत विदुलोपाख्यानम्*

***सिंहः***–*सिंह शब्दस्तावत् मृगराज पर्यायवाची*[5]*। किन्तु पूर्वपदात् परपदश्चेत्तदा श्रेष्ठता वाचकः स्यात्*[6]*। अयं हि शब्दो माना प्रयुज्यते। बहुधा वन्यजन्तूनाम् राजकृते तथा प्रतापशालिनि महापुष्ये नृपती च प्रयुक्तो भवति। रामायणकारेण रामस्य कृते प्रायोजि*[7] *तथा च भागवतकारेण सारमेयस्य कृते।*[8] *सिहशब्दस्य निरुक्तिः शाकटायन तौदादिकात् षित् क्षरणे धातोः कृता*[9]*, पाणिनिना हिसि हिसायाम् रौधादिकात् धातोः पृषोदरादिपाठे संनिवेश्य वर्णविपर्यय करवा विहिता भवेद् वर्णागमाद् हंसः सिंहो वर्णविपर्ययात्। गूढोत्मावर्णादि– कृतेर्वर्णनाशात्तु पृषोदरम्*[10]*। रघुवंशे मृगराजकृते सिहशब्दो बहुशः प्रयुक्तोऽस्ति*[11]*। शाकटायनस्य अपेक्षया पाणिनिना कृता सिंहशब्दस्य व्युत्पत्तिः धात्वर्थानुगुणत्वात् अतीव समीचीना।*

***जायाः*** *– जायतेऽस्यामिति विग्रहे अर्थात् पतियंस्यां स्वयमेव भूत्वा उत्पद्यते तेन जाया इति कथ्यते। उणादिकारेण दिव द्विगणस्य श्जनी प्रादुर्भाविश इत्यस्माद् धातोः जाया इति व्युत्पत्तिः कृता*[12]*। पुत्रार्थी दिलीपः सुदक्षिणायाम पुत्रं वाञ्छतीति मनसि निधाय कविवरेण जायेति प्रयुक्तम्–*
*अथ प्रजानानधिपः प्रभाते जाया प्रतिग्राहित गन्धमाल्याम्।*[13]
*अत्र तावत् जाया शब्दो हि यं भावं व्यनक्ति तम् भावम् अन्ये स्त्रीपर्यायवाचिनः शब्दा न व्यञ्जयितुम् शक्नुवन्ति।*

---

[5] *सिंहो भृगेन्द्रः पश्वास्यो ह्र्यक्षः केशरी हरिः। अमरको*

[6] *सिंहः कण्ठीरवे सत्तमे चौत्तरस्थितः।*
*सिंही क्षुद्रवृत्यिो स्याद् वासके राहुमातरि।। विश्वकोशः*

[7] *हीनं पुरुशसिंहेन रामेणक्लिश्टकर्मणा। रा.2 /56 /7*

[8] *युस्मद्विधान् मृगये ग्रामसिंहान् /भा.3 /18 /1*

[9] *उ.सू. 740*

[10] *पृशोदरादीनि यथोपदिश्टम् 6 /3 /109 प्रा.सू.*

[11] *(1) प्रसह्य सिंहः किल तां चकर्श 2/27*
*(2) सिंहोरुसत्त्वं निजगाद सिंहः 3 /33*
*(3) गामग्रतः प्रस्रविर्णीं न सिंहम् 3 /61*

[12] *उणादिसूत्र 550*

[13] *र.वां 2 /1*

*तनोतीति विष्तृणातीति विग्रहे तनादिगणपठितात् तनु विस्तारे इत्यरूमाद्धातोः उणादिकारेण तनयो व्युत्पचते[14]। कविस्तदा तनयष्शब्दं प्रायुड़्क्त यदा दिलीपागं नन्दिनीं वरमयाचत–वंषस्य कर्तामनन्तकीर्ति सुदक्षिणायां तनयंययाचे।[15] अत्रहिं तनयष्शब्दः वंषतननस्य यमभिप्रायं प्रकाशयति तमभिप्रांयं पुत्रः आत्मजः सूनु प्रभृतयः षब्दां न प्रकाायन्ति।*

***पुत्रः–*** *पुत्र संज्ञकं नाम नरकं श्पुत्श नाम दुःखं वा तस्माद् त्रायते इति विग्रहे 'त्रैड़.' पालने इत्यस्माद् धातोः पुत्रशब्दो व्युत्पन्नो भवति[16]। पुनातीति वंश्यान् इति विग्रहेऽपि पवनार्थकपूत्र धातोः उणादिना पुत्रो व्युत्पद्यते:[17] भौतिकसाधनापेक्षया पुत्रोऽतीव सुखदायकोत एव वाञ्छनीयरू प्रियश्च भवति। रघोः सर्वात्मना सन्तुष्टः कोत्सः तस्मै पुत्रार्थम आशिषमदात्––*

*पुत्रं लभस्वात्मगुणानुरूपं भवन्तमोङ्यं भवतः पितेव[18]।*
*अत्र पुत्र शब्दस्य प्रयोगः श्रेयोदाय के प्रेयोदायके अतीव समीचीनो भवति ।*

***पिताः*** *–पिता, पतिः द्वावपि शब्दी उणादिना निष्पद्यते। अदादिगणस्थ रक्षणार्थकपाधातोः तृच् प्रत्यययोगात् पिता इति[19]। तथा च 'इति' प्रत्यययोगात् पति इति निष्पन्नौ भवतः। पतिशब्दः स्त्रियाः भर्तरि लोकप्रसिद्धस्तथा पिता जनकस्यायें। पिता जनकरू द्वावपि क्वचित् क्वचिद् भिन्नार्थीकेऽपि प्रयुज्यते । जनकः केवले जन्म दायके प्रयुक्तो भवति किन्तु पितृशब्दो नानायकेषु। चाणक्यनीती कथितम् जनकः चोपनेता च यश्च विद्यां प्रयच्छति। अन्नदाता भय– त्राता पञ्चते पितरः स्मृताः।*

*अर्थात् जनकः जन्मदाता, उपनेता आचायर्रू, यदच विद्यां प्रयच्छति अध्यापयति उपाध्याय इति, अन्नदाता – अन्नादिना यः पालयति, भयत्राता विपदारक्षकः इत्येते पञ्चविधाः पितरो भवन्ति ।*
*कालिदासेन अनेकेषु अर्थेषु पितृशब्दरू प्रायोजि। यथा ईश्वरे–*

---
[14] उ. मू. 539
[15] र.वंष 2 /64
[16] पा.सू. 3 /2 /4
[17] उ.सू. 612
[18] र.वंष 5 /34 उ.सू. 252
[19] उ.सू. 497, 8 चा.नीति. 2 /52

*जगतः पितरौ वन्दे पार्वतीपरमेश्वरी[20], राजनि– स पिता पितरस्तासा केवलं जन्महेतवः[21] जनके– अतः पिता ब्रह्मण एवं नाम्ना तमाममा नमजं चकार।[22]*

*अनेन ज्ञातं भवति जनकाद भित्रेषु अपि बहुषु अर्थेषु पितृशब्दरू प्रयुक्तो भवति। यथा पितृशब्दस्य जनकातिरिक्तेषु बहुषु मर्थेषु प्रयोगो भवति तथा मातृशब्दस्यापि जननीमित्रेषु अपि अनेकार्येषु प्रयोगो संप्राप्यते। चाणक्यनीती कथितम्*

*राजपत्नी गुरोरू पत्नी मित्रपत्नी तथैव च।*
*पत्नीमाता स्वमाता चपचते मातरः स्मृता।[23]*

*अत्र तावत् मातृश्रेण्यां मित्रपल्याः गणना नोषित प्रतिभाति । तां प्रति दुविचारो मा उदेतु इति लेखकस्य आशयो ज्ञातव्यः ।*

*कविना अनेकेषु अर्थेषु मातृशब्दः प्रयुक्तः – पार्वत्याम् –जगतः पितरौ वन्दे पार्वतीपरमेश्वरो ।[24]*

*गविः – वत्सस्य होमाथं विधेश्वशेषमृषेरनुमधिगम्य मातः ।[25]*

*प्रथम पद्यखण्डे माता च पिता चेति द्वन्द्वसमासे कृते पितृशब्दस्य शेषो जायते। किन्तुः यः शिष्यते स लुप्यमानार्थाभिधायी इति परि– भाषानुसारेण शेषोऽपि पितृशब्दो मातृशब्दस्यापि वोधको भवति। मातृशब्दस्य व्युत्पत्तिस्तावद् चौरादिकमानपूजायाम इत्यस्माद् धातोः उणादिकारेण विहितः मानयतीति मातेति।[26]*

*पतिशब्दोऽपि मातृवद् पितृवद् बहुषु अर्थेषु कविना प्रयुक्तो दृष्टि– गोचरो भवति। सामान्यतः पतिशब्दः स्त्रिया भर्तरि लोकप्रसिद्धः । किन्तु पातीति पतिः इतिव्युत्पत्या अन्यशब्दसन्निधाने पालके वा प्रयुज्यते । तद्यथा–*

*1. निर्दिष्टां कुलपतिना स पार्णशालाम् ।[27]*
*2. नरपतिकूलभूत्यै गर्भमाधत्त राज्ञी ।[28]*

---

20 र.वं. 1 /1
21 र.वं. 1 /4
22 र.वं. 5 /36
23 चाणक्यनीति
24 र.वं. 1 /1
25 र.वं. 2 /66
26 3.सू. 4454
27 र.वं. 1 /15
28 र.वं. 2 /75

*3. न हीष्टमस्य त्रिदिवेऽपि भूपतेः ।*[29]

***फूलपतिः*** *– कुलस्य समूहस्य पतिः कुलपतिः। प्राचीनस्य ऋषीणामाश्रमस्य व्यवस्थापके आचार्ये वा रूढोऽयं शब्दः। संप्रति विश्वविद्यालयस्य प्रमुखाधिकारिणि प्रचलितो वर्तते नरपति–नराणां पतिः नरपतिः राजेति। तथा च भूपतिः भुवः पति भूपतिः राजेति।*

***पत्नीः*** *– पत्नीशब्दः पतिशब्दादेव निष्पन्नो भवति। यज्ञसंयोगे स्त्रीत्वविवक्षायाम् पतिशब्दस्य नकारादेशो जायते*[30] *। डीप्रत्ययस्तु नकारान्तत्त्वादेव सिद्धयति। वैदिकविवाहविधिना परिणीता सवर्णा स्त्री पत्नी इत्युच्यते। सा एव पत्या सह यज्ञादिकधर्मफलस्य सह– भागिनी भवति। कालिदासेन एतादृशे अर्थ बहुशः पत्नी शब्दः प्रयुक्त–*

1. *तत्तद् भूमिपतिः पत्न्यं दर्शयन् प्रियदर्शनः ।*[31]
2. *आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः ।*[32]
3. *तो गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दन्तुः ।*[33]

*जाया च पति चेति विग्रहे द्वन्द्वसमासविधीयमाने जायाशब्दस्य जम्भावो दम्भावश्च निपात्यते। तेन जम्पती दम्पती निष्पन्नौ भवतः*[34] *। कविना एतादृशा बहवः प्रयोगा अकारिषत् –*

*तौ दम्पती वसिष्ठस्य गुरोर्जग्मतुराश्रमम्।* [35]
*तौ दम्पती स्वां प्रति राजधानीम् ।*[36]

*वैदिकसाहित्ये दम् जम् शब्दी गृहस्य सम्पत्ती अर्थे प्रयुक्तो वर्तते। तस्याः पती रक्षको स्वामिनी वा स्त्री–पुरुषो द्वावपि भवत इत्याशयेन आचार्येण पाणिनिना निपातितो स्तः।*

---

29 र.वं. 3 /6
30 पा.सू. 4 /33
31 र.वं. 1 /47
32 र.वं. 1 /50
33 र.वं. 1 /57
34 पा.स. 2 /2 /31
35 र.वं. 1 /35
36 र.वं. 2 /70

***ऊरुः*** *–'ऊरु' शब्दो जघनवाची वर्तते। अस्य निरुक्तिः अदादि–*

*गणस्य ऊर्णूय[1] आच्छादने आतो भवित– ऊर्णूयते गुह्याम आच्छाद्यते इति ऊरुः। कविना विषेशणं मधावयरं 'वामोरु' 'रम्भोरु' 'करभोरु' करभोपमोरुशब्दांः प्रयुक्ताः–*

*करभोरु करोति मारुतः[37]*
*बद वामोरु चिताधिरोहणम।[38]*
*रम्भोरु कच्चिन्मनसो रुचितस्ते,[39]*
*प्रात्रीकराम्यां करभोपमोरुः।[40]*

*ऊरु षब्दादन्यों महति विये 'ऊरु' षब्दोऽपि निरुक्तो भवति।[41] कालदासेन यथा जघनवाची 'ऊरु' षब्दः बहुाः प्रयुंक्त तथामहति अर्थे 'ऊरु' षब्दोऽपी।[42] तद्यथा– दयितोरुतनकोटिसुस्थितिम्। आतः कुले तस्य किलोरुकीर्ति।[43]*

*महदथ्रवाचकादेव गुणवाचित्वात् विपुलत्वात् विशालत्वात् स्त्रीलिंङ्.गेंडीपि कृते[44] पृथिवीवाची 'उर्वी' शब्दो निष्पद्यते। कविना एशा बहुधा प्रयुक्ता–*

*तदथ्रमुर्वीमवदारयद्भिः।[45]*
*जुगोप गोरूप–धरामिवोर्वीम्।[46]*

***कुमार–*** *'कुमार' षब्दस्य कण्ड्वादिगण्यापठितात् 'कुमार' क्रीडायान' इत्यस्माद्धातो पचादिगणपाठात् अचप्रत्ययकृते सति निर्वचनम् भवति। कुमारः क्रीडाशील इति।[47] उणादिकारेण अस्य षब्दस्य निरूक्तिः धात्न्तरेण प्रकारान्तरेण 'कमु कान्ती' धातोर्विहिता।[48]*

37 र.वं. 8 /53
38 र.वं. 8 /57
39 र.वं. 6 /35
40 र.वं. 6 /83
41 उ.सू. 4229
42 रं.वं. 8 /36
43 र.वं. 6 /74
44 पा.सू. 4 /1 /44
45 पा.सू. 4 /1 /44
46 र.वं. 13 /3
47 र.वं. 2 /3
48 उभादिसूत्रम 4612

*कुमारः, कान्तिमान् इच्छावान् वेति। कुमारः बालके स्कन्दे कोशकारेण निर्दिश्ट कविवता। अस्य कुमारसंभवे स्कन्दस्य कृते बहुश प्रयोगः कृतः–*

*कुमारमुत्सतले दधाना[49]।*

*कुमारीशब्दोऽपि द्विधा एकोवयोवचनः। अपरो जातिवषमः। तथा च जातिलक्षणे ङीपि क्रियमाणे वृद्धाकुमारी अपि प्रयोगः।[50] कालिदासीय प्रयोगस्तु प्रथमवयोवाचित्वेन कान्तिमरवे इच्छा कुमारी इति।*

*चण्डी – चण्ड शब्दः कोपवाचकः। चण्डस्वरयन्तकोपनः इति। जयं हि अनेकेषु अर्थेषु प्रयुज्यते। रामायणकारेण कोपीला प्रायुज्यत। मातुलगृहे अयोध्यातः स्वमानेतुं समागतान् दूतान् स्वमा कुशलक्षेमं जिज्ञासमानो भरतोऽवादीत्–*

*आत्मकामा सदा चण्डी क्रोधना प्राज्ञमानिनी।*
*अरोगा चापि मे माता कैकेयी किमुवाच ह।।[51]*

*कालिदासोऽपि रामायणमनुसृत्य कैकेयीकृते चण्डी इत्यवोचत्–*

*सा किलाश्वासिता चण्डी भर्त्रा तत्संश्रुती वरौ।[52]*

*मेघदूते विरही यक्षः प्रणयभाषायाम् स्वस्याः प्रेयस्याः पत्न्या लोकोत्तरसौन्दर्यं वर्णयन् तान् प्रति स्वं प्रगाढप्रेम प्रकाशयन् इत्यमवदत् –*

*श्यामास्व चकितहरिणीप्रेक्षणे दृष्टिपातं*
*वक्त्रच्छायां शशिनि शिखिनां व भारेषु केशान्।*
*उत्पश्यामि प्रतुनुपु मदीवीचिषु भरूविलासान्*
*हन्तंकस्मिन् क्वचिदपि न से चण्डि ! सादृश्यमस्ति।[53]*

*बाणोऽपि स्वां प्रणयकुपितां प्रियतमां पत्नी रात्रिपर्यन्तमनु– नयमानः प्रणयमिश्रिक्रुद्धभाषायाम् ताम् अचकथत–*

---

49 *कुमारसंभव9 11 ।27*

50 *पा.सू. 4 ।1 ।53*

51 *व. रामासएरो 2 ।70 ।10*

52 *रं. वंषम् 12 ।5*

53 *उ.मेघ. 41*

*गतप्राया रात्रिः कृशतनुशशी शीर्यत इव.*
*प्रदीपोऽयं निद्रावशमुपगत धूपति इव।*
*प्रणामान्तो मानस्त्यजसि न तथापि क्रुधमहो,*
*कुचप्रत्यासत्या हृदयमपि ते चण्डि ! कठिनम्।।*

*भौवादिक 'चदिाने' औणादिक 'ड' प्रत्यययोगात् चण्ड इति[54],*
*त्तः गौरादिगणपाठात् ङीशि कृते सति चण्डी निपद्यते।[55]*

*महाकवीनाम् प्रयोगान् अवलोक्य तेषु अर्थसङ्गति च विचार्य चणि दाने – धातोरस्या निवर्चनम् असमीचीनम् प्रतिभाति। यतो हि धातोस्त– दर्यातिशयेन योगः न संगच्छते। अतएव भौवादिकादेव 'चडिकोपे' धारवन्तरात् पचादेराकृतिगणत्वेन अचप्रत्यये क्रियमाणे[56] इदिति– लक्षणनुमि च कृते चण्ड इति, ततः चण्डशब्दस्य गौरादिगणे समा– विष्टत्वात् ङीषि कृते सति चण्डी[57] इति कविवराणामर्थ सङ्गति– मवलोक्क्य इयं व्युत्पत्तिः समीचीना प्रतिभाति।*

***हरिः** – हरतीति विग्रेहे 'हृन् हरणे' धातोः ओणादिक इन् प्रत्यय– योगात् हरिनिष्पन्नो भवति।[58] हरिशब्दस्य अमरकोषे अनेकार्थो निर्दिष्टः। तद्यथा – यमानिलेन्द्र चन्द्रार्क विष्णु सिहांशुवाजिषु। शुका– .हिकपिभेकेषु हरिर्ना कपिले त्रिषु।*

*रघुवंशे अनेकेषु अर्थेषु हरिशब्दः प्रयुक्तो वर्तते। तद्यथा इन्द्रे–*
*यन्ता हरेः सपदि संहृतकार्मुकज्यम्।[59] अश्वे – ऊर्ध्व रथं हरि– सहस्रयुजं निनाय।[60]*

*विष्णो–*

1. *रामाभिधानो हरिरित्युवाच।[61]*

---

[54] *उणादिसू. 4313*
[55] *पा.सू. 4 /1 /41*

[56] *पा. सू. ३१ /१३४*

[57] *पा. सु. ४ /१ /४१*

[58] *उणादिसूत्र ४७६४*

[59] *रघुवंश १२ /१०३*
[60] *रघुवंश १२ /१०३*
[61] *,, १२ /१*

*2. हरिर्ययैकपुरुषोत्तमः स्मृतः।*[62]

*सिंहे–सन्यस्तशस्त्रो हरये स्वदेहम्।*[63] *हरिद्वर्णे – हरि विदित्व हरिभिश्व वाजिभिः।*[64]

*अत्र प्रश्न उदेति यत् हरणमेव हृब्धातोरर्थः तर्हि कथम् उपर्युक्ते एतेषु अर्थेषु धातोस्तदर्थातिशयेन योगाभावात् तत्तदर्थप्रत्यायक स्यादिति ? सत्यम्। यद्यपि धातुपाठे हरणमेव धातोरथ निदिष्टस्त थापि धातूनामनेकार्थो भवति – हरणप्रापणस्तेयनाशन स्वीकारादयश् तदर्थः स एव धातुप्रत्यययोगात् तत्तदभिधानेषु व्यक्तो बोभवतीति।*

*गौः गच्छतीति विग्रहे उणादिना गम्लुगतो धातोरू 'डो' प्रत्य कृते गौर्निष्पद्यते।*[65] *निरुक्तकारेण 'गाङ्गतो' धातोरपि निर्वाचन।*

---

[62] *,, ३।४६*

[63] *,, २।५६.*

[64] *,, २।४३.*

[65] *उणादिसूत्र ४४२८*